भगवन्मानसपूजा

भगवन्मानसपूजा

हृदंभोजे कृष्णः सजलजलदश्यामलतनुः
सरोजाक्षः स्रग्वी मुकुटकटकाद्याभरणवान् |
शरद्राकानाथप्रतिमवदनः श्रीमुरळिकां
वहन् ध्येयो गोपीगणपरिवृतः कुंकुमचितः || 1 ||

पयोंभोधेर्द्वीपान्मम हृदयमायाहि भगव-
-न्मणिव्रातभ्राजत्कनकवरपीठं भज हरे |
सुचिह्नौ ते पादौ यदुकुलज नेनेज्मि सुजलै-
-र्गृहाणेदं दूर्वाफलजलवदर्घ्यं मुररिपो || 2 ||

त्वमाचामोपेंद्र त्रिदशसरिदंभोऽतिशिशिरं
भजस्वेमं पंचामृतफलरसाप्लावमघहन् |
द्युनद्याः काळिंद्या अपि कनककुंभस्थितमिदं
जलं तेन स्नानं कुरु कुरु कुरुष्वाऽचमनकं || 3 ||

तटिद्वर्णे वस्त्रे भज विजयकांताधिहरण
प्रलंबारिभ्रातर्मृदुलमुपवीतं कुरु गळे |
ललाटे पाटीरं मृगमदयुतं धारय हरे
गृहाणेदं माल्यं शतदळतुलस्यादिरचितं || 4 ||

दशांगं धूपं सद्वरद चरणाग्रेऽर्पितमिदं
मुखं दीपेनेंदुप्रभवरजसं देव कलये |
इमौ पाणी वाणीपतिनुत सकर्पूररजसा
विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे || 5 ||

सदा तृप्तान्नं षड्रसवदखिलव्यंजनयुतं
सुवर्णामत्रे गोघृतचषकयुक्ते स्थितमिदं |
यशोदासूनो तत्परमदययाशान सखिभिः
प्रसादं वांछद्भिः सह तदनु नीरं पिब विभो || 6 ||

सचूर्णं तांबूलं मुखशुचिकरं भक्षय हरे
फलं स्वादु प्रीत्या परिमळवदास्वादय चिरं |
सपर्यापर्याप्त्यै कनकमणिजातं स्थितमिदं
प्रदीपैरारार्तिं जलधितनयाश्लिष्ट रुचये || 7 ||

विजातीयैः पुष्पैरतिसुरभिभिर्बिल्वतुलसी
युतैश्चेमं पुष्पांजलिमजित ते मूर्ध्नि निदधे |
तव प्रादक्षिण्यक्रमणमघविध्वंसि रचितं
चतुर्वारं विष्णो जनिपथगतेश्चांतविदुषा || 8 ||

नमस्कारोऽष्टांगः सकलदुरितध्वंसनपटुः
कृतं नृत्यं गीतं स्तुतिरपि रमाकांत त इयं |
तव प्रीत्यै भूयादहमपि च दासस्तव विभो
कृतं छिद्रं पूर्णं कुरु कुरु नमस्तेऽस्तु भगवन् || 9 ||

सदा सेव्यः कृष्णः सजलघननीलः करतले
दधानो दध्यन्नं तदनु नवनीतं मुरळिकं |
कदाचित्कांतानां कुचकलशपत्राळिरचना
समासक्तः स्निग्धैः सह शिशुविहारं विरचयन् || 10 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ भगवन्मानसपूजा संपूर्णं |